ISSN: 2349-5928

# HUMANITIES AND SOCIAL SCIENCE REVIEW

*(An International Peer Reviewed Refereed Journal)*

Editor in Chief

*Dr. Vinay Kumar Pandey*
Associate Professor
Faculty of S.V.D.V.
Banaras Hindu University, Varanasi

Scanned with CamScanner

# अभिज्ञानशाकुन्तले नृपस्य सङ्कल्पना

डा. डायालाल मालदेभाई मोकरिया †

मनुष्यः एक सामाजिक प्राणी वर्तते। सः समाजे जीवनं जीवति। सुखोपभोगः अपि समाजेन एव प्राप्यते। मनुष्येन एका सामाजिकी व्यवस्था कृता वर्तते। पुरातनकाले मनुष्यजीवनं पशुवत् आसीत्। कालान्तरे सः समूहजीवनं प्राप्नोति। तदा समूहस्य नायकस्य नियन्त्रकस्य च आवश्यकता उत्पन्ना भवति। तस्मात् नृपस्य संकल्पना उद्भवति। अस्माकं शास्त्रे अपि नृपस्य दैवी उत्पतिः दर्शिता वर्तते। मनुस्मृतौ मनुभगवान् कथयति यत् भगवता नृपस्य सर्जनं कृतम्।

**अराजके हि लोकेऽस्मिन्सर्वतो विद्रुते भयात्।**
**रक्षार्थमस्य सर्वस्य राजानमसृत्प्रभुः।।**
**इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च।**
**चन्द्रवित्तेशयोश्चैव मात्रा निह्रत्य शाश्वतीः।।**
**यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः।**
**तस्मादभिभवत्येष सर्वभूतानि तेजसा।।**[१]

प्राणीमात्रस्य रक्षणार्थं सामाजिकव्यवस्थार्थं स्वयं भगवता एव राज्ञः सर्जनं कृतम्। आधुनिकयुगे अपि राज्ञः महत्त्वं वर्तते। राजा स्वस्य मन्त्रीमण्डलस्य सेवकानां च साहाय्यतां प्राप्त्वा सुचारुराज्यव्यवस्थां करोति।

अस्माकं शास्त्रेषु राज्ञः स्पष्टरूपेण विभावना दत्ता। तथैव कवयः स्वकाव्येषु नृपस्य सङ्कल्पनां प्रकटीकरोति। महाकवयः भासः ,व्यासः,वाल्मीकिः, भवभूतिः इत्यादयः राज्यस्य राज्ञः च परिकल्पना काव्यमाध्यमेन ददति। तेषु महाकविः कालिदासः अपि वर्तते। सः अभिज्ञानशाकुन्तले नृपस्य यां सङ्कल्पनां ददाति सा समीक्षणीया वर्तते।

महाकविः कालिदासानुसारं विवेकः राज्ञः एका लाक्षणिकता वर्तते। अभिज्ञानशाकुन्तलस्य नायकः दुष्यंतः कण्वऋषेः आश्रमं प्रविशति तदा विनितवेशं धरति। नैतादृशमेव सः कण्वऋषेः शिष्याणां निर्देशेन आश्रममृगम् अपि न हन्ति। शिक्षणसंस्थायां तपस्वीनां तपम् अभ्यासः वा निर्विघ्ने प्रचलेत् तदर्थं सः स्वयं निरीक्षणं करोति।[२] आश्रमस्य रक्षणम् अपि सः स्वयमेव करोति। आवश्यकतानुसारं राज्ञः पुरूषमपि प्रेपयति।[३]राजा दुष्यन्तः आश्रमप्रवेशसमये स्वस्य आभूषणानि त्यक्त्वा सामान्यवेशं धरति।[४] समाजस्य उत्कर्षः शिक्षणेन एव भवति। अतः तत्कालिननृपाः अपि शैक्षणिकसंस्थां प्रति आदरयुक्ताः आसन्। तपस्वीनः अपि सन्माननीयाः आसन्। तपोधनाः ऋषिमुनयः आश्रमे विविधयज्ञान्

---

† आसि. प्रोफेसर, श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावलम्



Scanned with CamScanner

कृतवन्तः आसन्। तेषां यज्ञाः अपि प्रयोगाः आसन्। तैः ते राष्ट्रहितस्य कार्ये संलग्नाः आसन्। अतः तादृशाणान् ऋषिरुपान् शिक्षकान् प्रति नृपस्य अपारं सन्मानं स्वाभाविकम् आसीत्। अतः नृप स्वराज्ये अपि,स्वस्य नगरे अपि आश्रमात् आगतानां तपस्विनां तपस्वीनां योग्यादरसत्कारस्य व्यवस्थां करोति।[5] तेषां स्वागतार्थं राजा स्वयं प्रतिक्षां करोति। राज्यसर्वकारस्य अपि शिक्षकान् शैक्षणिकसंस्थाः। न प्रति अधिकादरः भवति।

राज्ञः समक्षं स्वस्य व्यक्तिगतं कार्यम् एवं राज्यस्य सामाजिककार्यम् आगच्छेत् तदा सः व्यक्तिगतं कार्यं गौणं करोति। राजा दुष्यन्तः पुत्रपिण्डपालनव्रतप्रसङ्गस्य व्यक्तिगतं कार्यं गौणं कृत्वा विदूषकं तस्मिन् प्रेषयति एवम् आश्रमस्य रक्षणस्य दायित्वं सः स्वीकरोति। अर्थात् अत्र राज्ञः दृष्ट्यां प्रजा एव प्रथमा वर्तते। राज्ञः आयस्य षष्ठमः भागः कररूपेण ग्रहणाति किन्तु आश्रमवासि नः तु धर्मस्य षष्टमं भागं स्वीकरोति। नस्य दृष्ट्यांशैक्षणिकसंस्थाअर्थोपार्जनस्य साधनं नास्ति। किन्तु संस्कारीनागरीकाः इच्छति।

राजा स्वार्थं नागरिकानां धनं नैच्छति। अभिज्ञानशाकुन्तले धनिमित्रस्य प्रसङ्गः वर्तते। तत्र धनमित्रनाम्नः वणिजः समुद्रे नौकाभङ्गः भवति तेन तस्य मृत्यु भवति। किन्तु राजा दुष्यन्तः तस्य तं धनं तस्य सगर्भायाः पत्न्याः गणयति। अत्र नृपः वारसदारं धनं ददाति। राजा स्वतन्त्र नास्ति। तस्य जीवनरीतेः अपि नियमाः सन्ति। याज्ञवल्क्यस्मतौ नृपस्य धर्माः दर्शिताः सन्ति।

**महोत्साहः स्थुललक्षः कृतज्ञो वद्ध सेवकः।**
**विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक्शूचिः।।**
**अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरूषस्तथा।**
**धार्मिकोऽव्यसश्चैव प्राज्ञः शूरो रहस्यवित्।।**
**स्वरन्ध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च।**
**विनीतस्त्वथ वार्तायां त्र्यां चैव नराधिपः।।६**

राज्ञः सुखोपभोगे निमग्नः न भवति। तस्य कार्यं तु प्रजाहितम् एव मुख्यम् अस्ति। तदर्थं सः सदैव प्रयत्नं करोति।[7] दुष्यन्तः सदैव लोकस्य कल्याणे एव रतः दृश्यते। कालिदाससदृशं महाकविः भवभूतिः अपि उत्तररामचरिते रामं तादृशरूपेण निरूपयति।

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।[8]**

लोकाराधनम् एव नृपस्य प्रमुखं कर्तव्यम् अस्ति। राजा विषयलोलुपः अपि न भवति। शापवशात् राजा दुष्यन्तः शकुन्तलां न जानाति। आगतां तां सुन्दरीं शकुन्तलां न स्वीकरोति। तदा तस्य एतादृशीं धर्मपरायणतां प्रतिहार्याः वाक्येन महाकविकालिदास प्रकटीकरोति। नृपः अपि शकुन्तलायाः प्रतिवाक्यानि श्रुत्वा कथयति यत् सः विषयलोलुपः नास्ति।[9] राजा कामपि क्षतिं कूर्यात् तदा तस्य स्वीकारं पश्चातापं च अपि करोति।दृष्यन्तः शकुन्तलायाः त्यागं करोति। किन्तु शापनिवृत्यनन्तरं तस्याः स्मरणं भवति। तदा सः अतीव पश्चातापम् अपि करोति। एवं तस्याः क्षमां अपि प्रार्थयते।[10]



Scanned with CamScanner

नृपः जनानां सेवकः वर्तते । यदि राजा अपि कस्यापि धर्मस्य सन्दर्भे अथवा नीतिविषयस्य निर्णये समस्यां अनुभवेत् तदा धर्मगुरूणां पुरोहितानां वा समक्षं परामर्शयति । एवं तेषां मतं ग्रहणाति । कौटिलीय-अर्थशास्त्रे अपि लिखितमस्ति-

**सहायसाध्य राजत्वं चक्रमेकं न वर्तते ।**
**कुर्वीत सचिवास्तस्मात्तेषां च श्रृणुयान्मतम् । ।**[११]

अभिज्ञानशाकुन्तले अपि राजा दुष्यन्तः विस्मृतिमुढः भवति अतः शकुन्तलां न जानाति एवं तस्याः स्वीकारर्थं पुरोहितस्य मार्गदर्शनं नयति ।[१२] एवं तस्य विचारम् अपि अनुचरति । राज्ये नृपस्य शासनं भवति तदपि लोकतान्त्रिकता अपि आसीत् । नृपः स्वयम् अनुकुलनिर्णयं कृत्वा इच्छानुसारं वर्तनं कतृन् नासीत् । इत्थं राज्ञः कृतेनिर्णयसंन्दर्भे मन्त्रिमण्डलस्य परामर्शः अपेक्षितः अस्ति । राजा सौदर्यस्य उपासकः अपि भवति । सौदर्य राजा दुष्यन्तः प्रारम्भे मुगस्य सौदर्य आकर्षितः । भवति । तदन्तरम् आश्रमे अपि शकुन्तलां दृष्ट्वा सः मुग्धः भवति । सः शकुन्तलायाः सौदर्यम् अन्तःपुरस्य राज्ञीनां अपेक्षया अत्यधिकं वर्ततेतादृशं स्वीकरोति । वनश्रीसदृश्याः शकुन्तलायाः वर्तनं राज्ञा दुष्यन्तः करोति-

**अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।**
**कुसुममिव लोभनीयं यौवेनमङ्गेषु संनद्धम् । ।**[१३]

अत्र, शकुन्तला सर्वाङ्गसुन्दरीरूपा प्रतिपादिता वर्तते । आश्रमस्य सौन्दर्यम् अपि सः अनुभवति। इत्थं राज्ञा सौन्दर्यदष्टा अपि भवति । नृपः सूक्ष्मदृष्टा अपि भवति । दुष्यन्तः आश्रमं प्रविशति तदा तपोवनस्य विस्तारस्य अनुमानं करोति-

**नीवाराः शुकगर्भकोटरमुखभ्रष्टस्तरूणामधः ।**
**प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपला ।**
**विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृग-**
**स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः । ।**[१४]

अत्र दुष्यन्तस्य सूक्ष्मनिरीक्षणशक्याः परिचयः प्राप्यते ।

नृपः कलायाः उपासकः अपि भवति । मनुष्यस्य जीवनं यान्त्रिकं न भवेत् एवं जीवनं आनन्दस्य समृद्धिः वर्धेत् तदर्थं उत्सवः कला मनोरञ्जनं इत्यादयः आवश्यकाः सन्ति । अभिज्ञानशाकुन्तले अपि राजा दुष्यन्तः राग्न्याः वसुमत्याः गीतं जागरुकतया श्रृणोति । एवं गूढार्थम् अपि ग्रहणाति ।अहोः रागपरिवाहिणी गीतिः[१५] -इत्युक्त्वा तां भावं प्रकटयति । राजा दुष्यन्तः चित्रकलाम् अपि जानाति । दुष्यन्तः शापनिवृत्यनन्तरं शकुन्तलायाः स्मरणं करोति तदा सः एकस्मिन् चित्रफलके तस्याः चित्रम् आलेखयति । अत्र नृपस्य कलां प्रति अनुरागः दृश्यते ।

नृपे वाक्चातुर्यम् अपि भवति । राजा दुष्यन्तः आश्रमं प्रविश्य आश्रमकन्याभिः सह वार्तालापं करोति तस्मिन् तस्य वाक्पटुता दुश्यते । मधुरवचनैः सः शकुन्तलायाः सम्पूर्ण परिचयं प्राप्नोति । राजा दुष्यन्तः विदूषकस्य समक्षं वार्तालापं करोति । तस्मिन् अपि तस्य वाक्चतुर्यं बुद्धिमता च दृश्यते । सः

स्वस्य प्रणयप्रसङ्गं विदूषकं कथयित्वा पुनः परिहास विजल्पितं सखे परमार्थेन न गृह्यतां वचः[१६] इत्युक्त्वा बुद्धिपूर्वकं गोपनीयतथ्यं गोपयति।

अभिज्ञानशाकुन्तले महाकविकालिदासेन आदर्शनृपस्य काश्चित् लाक्षणिकताः काव्यस्य माध्यमेन प्रस्तुताः कृताः। ताः आधुनिकराज्यव्यवस्थायाम् अपि महत्त्वं धरन्ति। आधुनिकराज्य-सञ्चालनकर्तृः कृते अपि लाभप्रदाः सन्ति।

**संदर्भः**


१. मनुस्मृतिः ,७/३,४,५

२. राजरक्षितव्यानि तपोवनानि नाम।, तत्रैव,पृ.९६

३. यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः। तत्रैव, पृ.९८

४. विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम।, तत्रैव पृ.९९

५. तेन हि मद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अभिज्ञानशाकुन्तलम् अङ्क ,५,पृ.१६६

६. याज्ञवल्क्यस्मृतिः ,आचाराध्यायः-१,३०९-३११

७. स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः प्रतिदिनमथवा ते वृत्तिरेवविधैव। अभिज्ञानशाकुन्तलम्,अङ्कः-५, पृ.१६८

८. उत्तररामचरितम्,१/१२

९. एवमादिभिरात्मकार्यनिर्वर्तिनीनामनुतमयवाङ् मधुभिराकृष्यन्ते विषयिणः। अभिज्ञानशाकुन्तलम्,अङ्कः-५ पृ.१७६

१०. सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमेहो मे तदा बलवानभूत्।
प्रबलतमसामेवप्रायाः शुभष्वपि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहशङ्कया।। तत्रैव,७/२४

११. कौटिलीयं अर्थशास्त्रम्, प्रकरणम्-३, अध्यायः-६,३, पृ.१९

१२. मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपाशुलः।। अभिज्ञानशाकुन्तलम्,५/२९

१३. अभिज्ञानशाकुन्तलम् १/२१

१४. तत्रेव,१/१४

१५. तत्रैव,अङ्क-५,पृ.१६४

१६. तत्रैव,अङ्कः-२/१८ ब


◈◈◈

Scanned with CamScanner